Postal Regd.No. GAMC- 1553/2022-2024
ISSN 2454-6313

संस्कृत-
साम्प्रतम्
(Sampratam means "Current")
(संस्कृतमासिकी पत्रिका)
वर्ष : १९ अङ्क : २२३
नवेम्बर - २०२४

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### द्वारस्य अन्वेषणम्

कश्चित् धर्मगुरुः शिष्यान् विशेषाध्ययनार्थं विभिन्नासु दिक्षु प्रेषितवान्। प्राप्ते काले शिष्याः पुनः समायाताः। तेषु एकः विलम्बेन प्रत्यागतः। पूर्वं समागतानां शिष्याणां ज्ञानार्जनेन गुरुः भृशं प्रसन्नः आसीत्। यतो हि विभिन्नैः विषयैः शिष्याणां मस्तिष्कं परिपूर्णम् आसीत्। पश्चात् विलम्बेन आगतं शिष्यं गुरुः सविस्मयं पृष्टवान् –'त्वं ननु विलम्बेन प्रत्यागतः। अतः किमपि विशिष्टम् अधीतवान् स्याः। किम् अधिगतवान् ?' शिष्यः प्रत्यवदत् – 'न प्राप्तं मया। प्रत्युत, भवतः सकाशात् पूर्वं यत् शिक्षितम् आसीत्, तदपि विस्मृतिं गतम्।' अनेन वचनेन गुरोः मनः परमं विषादं गतम्।

अथ कदाचित् सः शिष्यः गुरोः शरीरे संवाहनं कुर्वन् आसीत्। गुरोः पृष्ठभागे मर्दनं कुर्वन् शिष्यः स्वगतम् इव शनैः उक्तवान् – 'मन्दिरं सुन्दरं वर्तते, किन्तु अन्तः भगवतः मूर्तिः नास्ति।' गुरुः कथनस्य तात्पर्यं ज्ञातवान्। मम शरीरं सुन्दरं दृश्यते, किन्तु तस्मिन् ईश्वरस्य वासः नास्ति इति। वस्तुतः गुरुः एव भूतकाले उपादिशत् यत् मनुष्यस्य शरीरं मन्दिरं वर्तते, तत्र ईश्वरः वसति। एवं स्वनिन्दाश्रवणकुपितः गुरुः शिष्यम् आश्रमात् बहिष्कृतवान्।

कालः व्यतीतः। एकदा गुरुः स्वाध्याये निरतः आसीत्। तदा सः शिष्यः गुरोः समीपं गत्वा तूष्णीम् उपाविशत्। चिरकालं यावत् द्वयोः कोऽपि संवादः न जातः। अत्रान्तरे घटना घटिता। काचित् वनमक्षिका प्रकोष्ठं प्रविश्य, बहिः गन्तुं मार्गम् अन्विष्यति स्म। द्वारं तु पूर्वतः उद्घाटितम् एव आसीत्। सा तस्मात् द्वारात् एव प्रविष्टा। तथापि सा अन्धा इव पिहितात् द्वारात् निर्गन्तुं वृथा प्रयतते स्म। एतत् पश्यन् शिष्यः उत्थाय मक्षिकां तर्जितवान् – 'भोः मूढमते!' तत् द्वारं पिहितं वर्तते। क्षणं विरम। पृष्ठतः पश्य। यतः त्वं प्रविष्टा, तदेव द्वारं प्रति गच्छ।'

मक्षिका श्रुतवती वा न वा, किन्तु गुरुः अवश्यं श्रुतवान्। गुरुः जागरितः। सः तात्त्विकस्य द्वारस्य दर्शनं कृतवान्। शिष्येण यत् अधीतं तत् सामान्यं नास्ति इति गुरुः ज्ञातवान्। सत्यमेव, शिष्यः शिक्षित्वा न, अपि तु ज्ञात्वा प्रतिनिवृत्तः आसीत्। ततः गुरुः उक्तवान् – 'सत्यम् इदम्। मम मन्दिरे ईश्वरस्य प्रतिष्ठा नास्ति। तत् रिक्तम् अस्ति। तदपि सत्यं यत् अद्य यावत् अहं भित्तिषु एव शिरस्ताडनं कृतवान्। इतोऽपि अहं द्वारं नैव दृष्टवान्। अथ भवान् वदतु। द्वारं प्राप्तुं मया किं करणीयम्? मम सुन्दरं देहमन्दिरं केन उपायेन ईशतत्त्वेन परिपूर्णं भवेत्?'

शिष्यः अपि अवदत् – 'शरीरे ईश्वरस्य स्थापनां कर्तुम् इच्छति चेत् पूर्वं भवान् स्वयं रिक्तः भवतु। यत् वस्तु स्वयं पूर्वतः पूर्णं वर्तते, तदेव ईश्वरतत्त्वेन रिक्तं विद्यते। यः मनुष्यः रिक्तः भवति, तत्र भगवान् प्रवेष्टुम् उत्सहते। सत्यस्य द्वारं प्राप्तुम् इच्छति चेत्, सम्प्रति मक्षिका यत् करोति तत् भवान् करोतु।' गुरुः अवलोकितवान्। इदानीं मक्षिका किमपि न करोति। सा निश्चेष्टं भित्तौ उपविशति। गुरुः विलक्षणं दर्शनं प्राप्तवान्। ततः सः शनैः शनैः बहिः गच्छन्तीं मक्षिकां ध्यानेन निरीक्षितवान्। तत्त्वस्य द्वारं दृष्टवान्, शान्तेः च महत्त्वं ज्ञातवान्।

## स्वयंनिर्णयप्रवृत्तिः

– जातककथा



लक्ष्मीपुरनामके लघुग्रामे रामः सोमः कनकः चेति त्रयः सुहृदः निवसन्ति स्म । त्रयः अपि कृषिकाः एव । तेषु रामः सोमः च बुद्धिमन्तौ । कनकः तयोः मार्गदर्शनं प्राप्य एव सर्वाणि कार्याणि करोति स्म । तयोः अभिप्रायम् अपृष्ट्वा सः लघुविषये अपि निर्णयं न करोति स्म । त्रयाणाम् अपि मैत्री सुदृढा आसीत् इत्यतः रामः सोमः च सर्वदा कनकस्य साहाय्यं कुरुतः स्म एव ।

कदाचित् तैः त्रिभिः अपि उत्तमा फलसमृद्धिः प्राप्ता । अतः रामः सोमः च निश्चितवन्तौ राजधान्यां प्रचलिष्यमाणे वसन्तोत्सवे भागः ग्रहीतव्यः इति । यदा एषा वार्ता कनकेन ज्ञाता तदा सः तौ अवदत् यत् अहमपि भवद्भ्यां सह आगमिष्यामि ।

तदा रामसोमौ उक्तवन्तौ – "यात्रा दीर्घा अस्ति । राजधानी, गमनमार्गः वा ज्ञातपूर्वः तु न । अतः अतर्किततया विपदः उपस्थिताः भवेयुः अपि । तस्मात् भवतः अनागमनम् एव वरम्" इति ।

मित्राभ्यां बहुधा बोधितं चेदपि कनकः न अङ्गीकृतवान् । सः अवदत् – "यावत् भवन्तौ मया सह भवतः तावत् मम भीतिः किमर्थम् ? अहम् अपि भवद्भ्यां सह आगमिष्यामि एव" इति ।

ततः त्रयः अपि प्रयाणम् आरब्धवन्तः । अरण्यमार्गे गच्छन्तः आसन् ते । काचित् नदी अतिक्रमणीया अभवत् तैः । अतः ते तीरे इतस्ततः दृष्टवन्तः । सौभाग्यवशात् तत्र कश्चन उडुपः दृष्टः तैः । ते तम् उडुपम् आरुह्य नदीक्रमणाय उद्युक्ताः जाताः ।

नद्याः उत्पत्तिप्रदेशे वृष्टिः जाता इत्यतः नद्याम् अकस्मात् प्रवाहः प्रवृद्धः । क्षणे क्षणे प्रवाहवेगः प्रवृद्धः । तस्मात् तेषाम् उडुपः प्रवाहेण नीयमानः जातः । त्रयः अपि भीत्या परस्परम् आलिङ्ग्य उपविष्टवन्तः ।

किञ्चित्कालानन्तरं ते यावत् नेत्रे उन्मीलितवन्तः तावता तेषाम् उडुपः कस्मिंश्चित् द्वीपतीरे स्थितः आसीत् । महती बुभुक्षा तान् बाधते स्म । तीरे एव कश्चन आम्रवृक्षः तैः दृष्टः । अतः आम्रफलानि प्राप्तुं ते द्वीपे पदं स्थापयन्तः वृक्षसमीपं गतवन्तः ।

रामः यावत् फलं प्राप्तुं हस्तं प्रसारितवान् तावता कश्चन पिशाचः तस्मात् वृक्षात् उत्प्लुत्य क्रोधेन अगर्जत् – 'मम अनुज्ञां विना कः सः आम्रम् उत्पाटयितुं प्रवर्तते ?" इति ।

पिशाचं दृष्ट्वा ते त्रयः अपि ततः धावनाय यावत् उद्युक्ताः तावता पिशाचः उच्चैः हसन् अवदत् – "भो भोः ! अलं भीत्या । अहम् अपायं कमपि न करोमि । मा धावन्तु भवन्तः" इति ।

भयम् अनुभवन्तः एव त्रयः अपि पिशाच-समीपं गतवन्तः । ''भवद्भिः कथम् अत्र आगतम् ?'' इति अपृच्छत् पिशाचः ।

ते प्रवृत्तं सर्वम् अवदन् । तेषां दुरवस्थां दृष्टवान् पिशाचः तेभ्यः फलानि दत्तवान् । तानि खादित्वा ते तं कृतज्ञतावचनानि अवदन् । तेषां व्यवहारेण सन्तुष्टः पिशाचः तान् अवदत् - ''इतः अन्यत्र भवतां गमनं सर्वथा असम्भवम् । अतः अहम् एकैकस्मै एकैकं वरं ददामि । किन्तु त्रिभिः अपि समानः वरः न याचनीयः इति तु नियमः । यत् इष्यते तत् प्रार्थ्यताम्" इति ।

''मां पत्नीपुत्रादीनां समीपं नयतु'' इति अवदत् रामः । पिशाचः अनन्तरक्षणे तं तत्र प्रापयत् ।

''वसन्तोत्सवे भागग्रहणाय अहम् उद्युक्तः आसम् । अतः मां राजधानीं प्रापयतु" इति प्रार्थितवान् सोमः । पिशाचः तं राजधानीं प्रापितवान् ।

इदानीं वरप्रार्थनावसरः आसीत् कनकस्य । किं प्रार्थनीयम् इति न ज्ञातं तेन । सहायकौ रामसोमौ न आस्तां तत्र । किञ्चित्कालं सः अचिन्तयत् । ततः किमपि सङ्कल्प्य सः पिशाचम् अवदत् - ''किं प्रष्टव्यम् इति मया न ज्ञायते । अहं सर्वदा एतादृशेषु प्रसङ्गेषु मित्रयोः साहाय्यं स्वीकरोमि । अतः रामसोमौ अत्र आनीयेताम्'' इति ।

अनन्तरक्षणे एव पिशाचः रामसोमौ तत्र उपस्थितौ कृत्वा ततः अदृश्यतां गतः । किं प्रवृत्तम् इति रामसोमौ अवगतवन्तौ ।

तौ विषादम् अनुभवन्तौ कनकम् उक्तवन्तौ - ''एवं किमपि भवेत् इति विचिन्त्य एव आवाभ्याम् उक्तम् आसीत् यत् भवता न आगन्तव्यम् इति । 'मां गृहं प्रापय' इति यदि भवान् पिशाचम् अवदिष्यत् तर्हि एतत् कष्टं न अभविष्यत् । मार्गदर्शनप्राप्त्यर्थम् आवाम् अत्र आनाय्य कष्टे पातितौ भवता । इतः गृहं प्रति अस्माकं गमनं कथं भवेत् ?' इति ।

अल्पे एव काले पिशाचः पुनरपि प्रत्यक्षीभूय कनकम् अपृच्छत् - ''किं भवता मित्रयोः साहाय्यं प्राप्तम् ?'' इति ।

पिशाचस्य उपस्थितिं दृष्ट्वा सन्तुष्टौ रामसोमौ उक्तवन्तौ - ''एषः लघुप्रसङ्गे अपि आवयोः साहाय्यं याचते । तस्मात् एवं प्रवृत्तम् । कृपया भवान् एतं ग्रामं प्रापयतु, आवां च पूर्वं यत् प्रार्थितवन्तौ तदनुगुणं करोतु । ततः आजीवनं कृतज्ञाः भवामः वयम्'' इति ।

एतत् श्रुत्वा हसन् पिशाचः अवदत् - ''अन्यस्य मार्गदर्शनप्राप्तिः न दोषाय । तथापि सर्वदा एतत् न शोभते । उचितानुचितनिर्णयः स्वयं करणीयः । बुद्धिहीनतया व्यवहरन्तः यदि वयं सदा अन्यान् एव अवलम्बामहे तर्हि स्वयं कष्टे पतन्तः अन्यान् अपि कष्टे पातयेम'' इति । ततः सः तान् त्रीन् अपि तत्तदभिलषितं स्थलं प्रापितवान् ।

निर्णयस्वीकारे अन्येषाम् अवलम्बनेन कीदृशं कष्टं भवति इति कनकः सम्यक् अवगतवान् ।

तस्मात् सः प्रयत्नेन स्वयंनिर्णयप्रवृत्तिम् आरब्धवान् । अचिरात् एव सः तत्र सफलतां प्राप्तवान् अपि ।

# अभिषेकनाटकम् ( ग्रन्थपरिचयः )

व्योम शाहः

अनुवर्तते

महाकविभासप्रणीते अभिषेकनाटके एतावता अस्माभिः दृष्टं यत्–

प्रथमे अङ्के रघुकुलप्रदीपः श्रीरामः सुग्रीवस्य पक्षे स्थित्वा तयोः सुग्रीववालिनोः भीषणे युद्धे प्रारब्धे सति सः अदूरादेव क्षेत्रात् प्रच्छन्नः सन् स्वीयं शरं वालिनं प्रति प्रक्षिप्तवान्। अवशिष्टे आयुषि राम–वालि–सुग्रीवाणां मिथः संलापः अभवत्। अचिरेणैव सः मृत्युम् आप्तवान्। "लक्ष्मण ! सुग्रीवस्याऽभिषेकं कल्प्यताम्" इति वचनेन प्रथमाङ्कस्य समाप्तिः भवति। द्वितीये अङ्के हनुमान् स्वशक्त्या सागरम् उल्लङ्घ्य लङ्कापुरीं प्राप्तवान्। तत्र सीतां मृगयमाणः सः प्रमदवनं गतवान्। तत्र एकस्य वृक्षस्य गह्वरे स्थित्वा सः सीतारावणयोः संवादम् अशृणोत्। तदनन्तरं सः खिन्नां सीतां श्रीरामस्य कुशलवार्ताम् अश्रावयत्। तृतीये अङ्के तत्र स्वीयम् आगमनं प्रदर्शयितुं सः वने किञ्चिद् विनाशं कृतवान्। कैश्चित् सेवकैः कैश्चित् च सैनिकैः सह युद्धानन्तरं यदा रावणपुत्रः इन्द्रजित् स्वयं तं प्रतिग्रहीतुम् आगतः, तदा पाशेन बद्धः सः राजसभां नीतः। अचिरेण कालेन मुक्तः सः पुनरपि श्रीरामपादान्ते प्राप्तवान्। रावणविभीषणयोः कलहानन्तरं विभीषणः ततः निर्गतवान्। चतुर्थे अङ्के रामविभीषणयोः सङ्गमः अभवत्। श्रीरामेण वरुणदेवः मार्गं प्रदातुं प्रार्थितः। पञ्चमे अङ्के सर्वेऽपि तेनैव लङ्कापुरीं प्राप्तवन्तः। कुम्भकर्णः प्रहस्तश्च समरे हतौ। इतः कथंचित् सीताम् अनुकूलयितुं रावणः अशोकवनिकां प्राविशत्। तदैव प्रपञ्चानुसारं राक्षसः प्रविश्य रामलक्ष्मणयोः शिरसी रावणं दर्शयति। यदा प्रपञ्चः सम्पन्नः इव आसीत् तदैव एकेन राक्षसेन अनापृच्छ्य आगतेन इन्द्रजितः मरणं रावणाय निवेदितम्। पुत्रस्य निहननं श्रुत्वा अतिखिन्नः सः समराय निर्गच्छति।

षष्ठाङ्कस्य विष्कम्भके त्रयाणां विद्याधराणां युद्धं प्रेक्षितुम् आगमनं रामरावणयोः च ससैन्ययोः भीषणस्य युद्धस्य वर्णनं वर्तते। तस्यैव अन्तिमे भागे इदं विज्ञाप्यते यद् राघवेण रावणः निपातितः। सर्वे विद्याधराः रामं सम्भावयितुं गच्छन्ति। ततः अङ्कस्य प्रारम्भः रामस्य सीतां समाश्वासयितुं गमनपूर्वकः भवति। रामः चिन्तयति यत् राक्षसकुले निवासं कृतवत्याः सीतायाः दर्शनेन साम्प्रतम् अलम्। तदैव एकत्र रामः विभीषणं 'लङ्काधिपते' इति सम्बोधयति येन ज्ञायते यद् विभीषणस्य नृपत्वं निश्चितम्। रामस्य ईदृशम् अभिप्रायं ज्ञात्वा सीता अग्निप्रवेशनाय अनुज्ञां प्राप्तुं लक्ष्मणम् अकथयत्। लक्ष्मणः हनुमता सह एतत् कार्यम् अनुवर्तयितुं गतः। ततः हनुमान् रामाय निवेदयति यत् –

**एषा कनकमालेव ज्वलनाद् वर्धितप्रभा। पावना पावकं प्राप्य निर्विकारमुपागता ॥**

अग्निदेवः स्वयं प्रादुर्भूय सीतां रामाय समर्पयति। रामोऽपि कथयति–

**जानताऽपि च वैदेह्याः शुचितां धूमकेतन। प्रत्ययार्थं हि लोकानाम् एवमेव मया कृतम् ॥**

सर्वेऽपि गन्धर्वाः गीतं गायन्ति देवाः च रामं स्तुवन्ति। इतः अग्निदेवः अभिषेकार्थं रामाय मार्गं दर्शयति। सर्वत्राऽपि जयजयारवः प्रसृतः। रामः आत्मानं धन्यं मन्यमानः हृष्टः। तदैव भरतशत्रुघ्नादीनाम् आगमनम् अग्निदेवेन सूच्यते। श्रीरामः अग्निदेवं प्रति धन्यतां ज्ञापयति। नाटकस्य समाप्तिः भरतवाक्येन भवति –


**भवन्त्वरजसो गावो परचक्रं प्रशाम्यतु। इमामपि महीं कृत्स्नां राजसिंहः प्रशास्तु नः ॥**

**मूलस्त्रोतसः कृतानि परिवर्तनानि**– यद्यपि नाटकं पूर्णतया वाल्मीकिरामायणानुसारि, समुद्रं द्विधाकृत्य लङ्कां प्रति गमनं हनुमता च कृतस्य लङ्कायाः दहनस्य अनुल्लेखः भासस्य मौलिकता। इत्यलं विस्तरेण ॥

**( समाप्तम् )**


## मासवार्त्ता:

### सम्पन्नः संस्कृतगरबाकार्यक्रमः














एकलव्य–संस्कृत–एकेडेमी प्रतिवर्षं नवरात्रे संस्कृतगरबाकार्यक्रमस्य आयोजनं करोति। एतस्मिन् वर्षेऽपि ऑक्टोबरमासस्य ६ दिनाङ्के सम्पन्नः भव्यः संस्कृतगरबाकार्यक्रमः। संस्कृतभाषायाः प्रचाराय आयोजितेऽस्मिन् संस्कृतगरबाकार्यक्रमे मातुः नीराजनतः आरभ्य द्वितालगरबा, त्रितालगरबा, भाङ्गडा इत्यादीनि ५० गीतानि प्रस्तुतानि। श्रीधवलकुमारस्य धैर्या मांकडस्य च मार्गदर्शने श्रीमती भावना रावलः, पारुल व्यासः, श्रीमती माधवी झाला, श्रीजतीनः पटेलः, कु. हनी रावलः च सवाद्यं सुमधुराणि गरबागीतानि अगायन्। अत्र उल्लेखनीयं यत् संस्कृतभाषायाः प्रचाराय ऑक्टोबरमासस्य ९ दिनाङ्के संस्कृतविद्याप्रतिष्ठानम्, अमदावाद–संस्कृत–एकेडेमी, नवरङ्गविद्यालयः च इत्येतेषां संयुक्तोपक्रमेण नवरङ्गविद्यालयस्य प्राङ्गणे अपरः भव्यः संस्कृतगरबाकार्यक्रमः सम्पन्नः। कार्यक्रमेऽस्मिन् २००० जनाः भागम् अवहन्। उभौ अपि कार्यक्रमौ सफलौ।

## कृपया हसन्तु

नमनः त्वरया रङ्गवल्लीं रचयन् आसीत् । तं दृष्ट्वा -

**रमणः** - (नमनम् उद्दिश्य) भोः किमर्थम् एतावत्या त्वरया रङ्गवल्लीं रचयन् अस्ति ?

**नमनः** - भोः, मम समीपे रङ्गवल्ल्याः कृते वर्णाः न्यूनाः सन्ति । वर्णाः समाप्ताः भवेयुः तस्मात् पूर्वं रङ्गवल्लीं समापयितुम् इच्छामि ।

★ ★ ★ ★ ★

**बालः** - (आपणिकं प्रति) भोः महोदय ! गौरवर्णीयां त्वचं प्राप्तुं लेपः अस्ति वा ?

**आपणिकः** - आम्, अस्ति !!!

**बालः** - तर्हि भवान् स्वयं भवतः मुखस्योपरि किमर्थं न लिम्पति ? भवन्तं दृष्ट्वा वयं सर्वे बिभीमः ।

★ ★ ★ ★ ★

शीतकाले प्रातः दुःखेन उपविष्टं रमणं दृष्ट्वा नमनः अपृच्छत् - 'भोः रमण ! किमर्थम् एवम् उपविष्टोसि ?'

**रमणः** - किं करवाणि मित्र ! भगवता दत्तं सर्वम् अस्ति । द्रोणी अस्ति, द्रोण्यां जलम् अस्ति, फेनकमपि अस्ति । केवलं स्नातुं साहसं नास्ति ।

## सुभाषितम्

**- संस्कृतविकिपीडियाजालस्थानात्**

**यदचेतनोऽपि पादैः स्पृष्टः प्रज्वलति सवितुरिनकान्तः ।**
**तत्तेजस्वी पुरुषः परकृतविकृतिं कथं सहते ॥**

**तात्पर्यम्** – लोके सामान्यः पुरुषः अपि अन्यैः कृतं स्वस्य अपमानं न सहते । स्वाभिमानी पुरुषः अन्यैः कृतम् अपमानं न सहते इति तु न वक्तव्यम् । तस्य उदाहरणं अपि कविना दत्तं यत् सूर्यकान्तमणिः यदा सूर्यकिरणैः स्पर्शं प्राप्नोति तदा झटिति प्रज्वलति । अचेतने मणौ एव एतादृशः स्वभावः दृश्यते । सचेतनानां विषये तु वक्तव्यमेव नास्ति ।

**यद्दुष्करं दुरापं च कल्याणोदर्कमन्ततः ।**
**तदेव यत्नतः साध्यं प्राणैरपि धनैरपि ॥**


**तात्पर्यम्** – यत् कर्तुम् असाध्यं, प्राप्तम् असाध्यं किन्तु अत्यन्तं कल्याणकरम् इति भवेत् तत् कथञ्चित् समग्रस्य धनस्य समर्पणेन वा प्राणानां समर्पणेन वा साधनीयमेव ।

**यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।**
**स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥**

**तात्पर्यम्** – ज्येष्ठैः यद् क्रियते तदेव अन्यैः अपि क्रियते । ज्येष्ठाः यत् प्रमाणमिति वदन्ति तदेव अन्ये अनुसरन्ति ।

## ज्ञानसरित्

श्यामः पटेलः



**समुद्रस्य शुकः – ''पफीन''** – एटलाण्टिक-समुद्रस्य तटीयप्रान्तेषु अनेकविधाः खगाः दृश्यन्ते । तत्र शुकः इव दृश्यमानः पफीन-नामकः खगः अन्यतमः अस्ति। सः सामुद्रिकशुकः इति नाम्ना विख्यातः अस्ति।

तस्य चञ्चुः शुकस्य चञ्चुः इव भवति। किन्तु तत्रापि वैशिष्ट्यम् अस्ति यत् पफीन-पक्षिणः चञ्चोः वर्णः प्रत्येकं ऋतौ परिवर्तितः भवति। शीतकाले भस्मवर्णीया चञ्चुः प्राप्ते वसन्ते रक्तवर्णीया सम्भवति। अस्य औन्नत्यं केवलं १० इञ्चमितं भवति तथा च शरीरस्य भारः अर्धकिलोमितः भवति । पफीन-पक्षी प्रायः समुद्रतटे एव वसति । समुद्रस्य तरङ्गाणाम् उपरि सौकर्येण स्थिरतापूर्वकम् उपवेष्टुं शक्नोति । सः तरणे कुशलो वर्तते । तरणावसरे जलक्षेपणाय सः पक्षयोः प्रयोगं करोति । मृगयायै सः समुद्रस्य जले २०० फीटमितं यावत् गन्तुं पारयति । किन्तु सः गभीरे जले पञ्च क्षणान् यावत् जीवितुं शक्नोति । पफीन-पक्षी मत्स्यानां लघुजलचराणां च मृगयां कृत्वा जीवनिर्वाहं करोति। तरणपटुः एषः डयने अपि तीव्रगामी अस्ति। एकस्मिन् निमेषे सः चतुश्शतवारं पक्षयोः चालनं कृत्वा प्रतिघण्टं ८८ किलोमीटरमितेन वेगेन डयितुं शक्नोति। विश्वस्य प्रायः षष्टिप्रतिशतं पफीन-पक्षिणः वसन्ततौ प्रजननावसरे उत्तर-एटलाण्टिक-समुद्रस्य आइसलेण्ड-प्रदेशे समवेताः भवन्ति । तत्र उच्चभूमौ शिलायाः च उपरि तृणपिच्छानां नीडं निर्माय अण्डानि स्थापयन्ति।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **मञ्जूषा** | संदूक | chest |
| **आशंसा** | इच्छा | desire |
| **निराशः** | आशारहित | hopeless |
| **गडुलः** | कुबड़ा | humpbacked |
| **समिद्धः** | सुलगाया हुआ | lighted up |
| **स्नेहप्रियः** | दीपक | lamp |
| **उद्धर्षः** | प्रसन्न | great joy |
| **प्रश्रितः** | विनीत | humble |
| **प्रश्लथः** | उत्साहहीन | spiritless |
| **काण्डः** | बाण | arrow |
| **भूष्णुः** | होनेवाला | being |
| **प्रथा** | ख्याति | fame |
| **प्रणादः** | चीत्कार | loud noise |
| **प्रकला** | सूक्ष्मांश | minute portion |
| **कल्यः** | स्वस्थ | healthy |

## किं भवन्तः जानन्ति ?

**१ ) कुत्र सूर्यमन्दिरं नास्ति ?**
(क) कोणार्के (ख) पुष्करे (ग) मट्टने (घ) प्रयागे

**२ ) भर्तृहरेः गुहा कुत्र स्थिता वर्तते ?**
(क) नासिके (ख) कश्मीरे (ग) पुष्करे (घ) लद्दाखे

**३ ) एतेषु किं स्थानं जैनतीर्थं मन्यते ?**
(क) लुम्बिनी (ख) श्रावस्ती (ग) सारनाथ (घ) कपिलवस्तु

**४ ) एतेषु किं स्थानं बौद्धतीर्थं मन्यते ?**
(क) कुशीनगरम् (ख) श्रावस्ती (ग) पावापुरी (घ) राजगृहम्

**५ ) स्वामिनः रामतीर्थस्य जन्म पञ्जाबस्य कस्मिन् जनपदे अभवत् ?**
(क) पटियाला (ख) लुधियाना (ग) गुजरांवाला (घ) अबोहर

**६ ) एतासु कुत्रत्याः गुहाः चित्रकलायाः उत्कृष्टम् उदाहरणं वर्तते ?**
(क) पुष्करस्य (ख) अजन्तायाः (ग) शीहोरस्य (घ) खजुराहोस्थाः

**७ ) एतेषु कस्मिन् स्थाने सूर्यग्रहणावसरे मेला भवति ?**
(क) कुरुक्षेत्रे (ख) वाराणस्याम् (ग) प्रयागे (घ) पुष्करे

उत्तराणि – (१) घ (२) ग (३) ख (४) क (५) ग (६) ख (७) क

## अस्माकम् आगामिकार्यक्रमा:

EKLAVYA SANSKRIT ACADEMY

जयतु संस्कृतं जयतु भारतम्

# दीपावलीवर्ग:

**(6 Nov 2024 to 16 Nov 2024)**

## संस्कृतव्याकरणम्

(Class 9-10)

8am to 9:30am

3000/-

## बालसंस्कृतवर्ग:

(Class 1 to 8)

10am to 11:30am

2500/-

**contact: Dr Mihir Upadhyay, 98246 16237**

EKLAVYA SANSKRIT ACADEMY

जयतु संस्कृतं जयतु भारतम्

## Value Education Through Sanskrit

# बालसंस्कृतवर्ग:

**(Class SKg to 8)**

**Offline**

**Date :** 23/11/24 to 29/3/25

**Day :** Saturday

**Time :** 6:00pm to 7.30pm

**Fees :** 4000/-

**contact: Dr Mihir Upadhyay, 98246 16237**

संस्कृत-
## साम्प्रतम्

नमस्कार:

यदि भवन्त: "साम्प्रतम्" मासिकीपत्रिकाया: ग्राहका: भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | – 100 |
| द्वैवार्षिकं रू | – 175 |
| त्रैवार्षिकं रू | – 250 |
| अङ्कमूल्यं रू | – 10 |





**सर्वेभ्य: पाठकेभ्य:**
**नूतनवर्षाभिनन्दनानि ।**

**– सम्पादक:**

**प्रियवाचका:**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्या: लेखा:, कथा:, हास्यकणिका: वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकाया: विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY

|| जयतु संस्कृतं जयतु भारतम् ||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006